# শ্রীদুর্গাষ্টোত্তর শতনামস্তোত্র ২

{॥ শ্রীদুর্গাষ্টোত্তর শতনামস্তোত্র ২ ॥}

॥ওঁ শ্রী দুর্গা পরমেশ্বর্যৈ নমঃ ॥

অস্যশ্রী দুর্গাষ্টোত্তর শতনামাস্তোত্র মালামন্ত্রস্য

মহাবিষ্ণু মহেশ্বরাঃ ঋষযঃ,

অনুষ্টুপ্ছন্দঃ, শ্রীদুর্গাপরমেশ্বরী দেবতা,

হ্রাং বীজং, হ্রীং শক্তিঃ, হ্রূং কীলকং,

সর্বাভীষ্টসিধ্যর্থে জপহোমার্চনে বিনিযোগঃ ।

ওঁ সত্যা সাধ্যা ভবপ্রীতা ভবানী ভবমোচনী ।

আর্যা দুর্গা জযা চাধ্যা ত্রিণেত্রাশূলধারিণী ॥

পিনাকধারিণী চিত্রা চংডঘংটা মহাতপাঃ ।

মনো বুদ্ধি রহংকারা চিদ্রূপা চ চিদাকৃতিঃ ॥

অনন্তা ভাবিনী ভব্যা হ্যভব্যা চ সদাগতিঃ ।

শাংভবী দেবমাতা চ চিন্তা রত্নপ্রিযা তথা ॥

সর্ববিদ্যা দক্ষকন্যা দক্ষযজ্ঞবিনাশিনী ।

অপর্ণাঽনেকবর্ণা চ পাটলা পাটলাবতী ॥

পট্টাংবরপরীধানা কলমংজীররংজিনী ।

ঈশানী চ মহারাজ্ঞী হ্যপ্রমেযপরাক্রমা ।

রুদ্রাণী ক্রূররূপা চ সুন্দরী সুরসুন্দরী ॥

বনদুর্গা চ মাতংগী মতংগমুনিকন্যকা ।

ব্রাম্হী মাহেশ্বরী চৈন্দ্রী কৌমারী বৈষ্ণবী তথা ॥

চামুংডা চৈব বারাহী লক্ষ্মীশ্চ পুরুষাকৃতিঃ ।

বিমলা জ্ঞানরূপা চ ক্রিযা নিত্যা চ বুদ্ধিদা ॥

বহুলা বহুলপ্রেমা মহিষাসুরমর্দিনী ।

মধুকৈঠভ হন্ত্রী চ চংডমুংডবিনাশিনী ॥

সর্বশাস্ত্রমযী চৈব সর্বধানবঘাতিনী ।

অনেকশস্ত্রহস্তা চ সর্বশস্ত্রাস্ত্রধারিণী ॥

ভদ্রকালী সদাকন্যা কৈশোরী যুবতির্যতিঃ ।

প্রৌঢাঽপ্রৌঢা বৃদ্ধমাতা ঘোররূপা মহোদরী ॥

বলপ্রদা ঘোররূপা মহোৎসাহা মহাবলা ।

অগ্নিজ্বালা রৌদ্রমুখী কালারাত্রী তপস্বিনী ॥

নারাযণী মহাদেবী বিষ্ণুমাযা শিবাত্মিকা ।

শিবদূতী করালী চ হ্যনন্তা পরমেশ্বরী ॥

কাত্যায়নী মহাবিদ্যা মহামেধাস্বরূপিণী ।
গৌরী সরস্বতী চৈব সাবিত্রী ব্রহ্মবাদিনী ।
সর্বতত্ত্বৈকনিলয়া বেদমন্ত্রস্বরূপিণী ॥

ইদং স্তোত্রং মহাদেব্যাঃ নাম্নাং অষ্টোত্তরং শতম্ ।
যঃ পঠেত্ প্রযতো নিত্যং ভক্তিভাবেন চেতসা ।
শত্রুভ্যো ন ভযং তস্য তস্য শত্রুক্ষযং ভবেত্ ।
সর্বদুঃখদরিদ্রাচ্চ সুসুখং মুচ্যতে ধ্রুবম্ ॥

বিদ্যার্থী লভতে বিদ্যাং ধনার্থী লভতে ধনম্ ।
কন্যার্থী লভতে কন্যাং কন্যা চ লভতে বরম্ ॥

ঋণী ঋণাত্ বিমুচ্যেত হ্যপুত্রো লভতে সুতম্ ।
রোগাদ্বিমুচ্যতে রোগী সুখমত্যন্তমশ্নুতে ॥

ভূমিলাভো ভবেত্তস্য সর্বত্র বিজযী ভবেত্ ।
সর্বান্কামানবাপ্নোতি মহাদেবীপ্রসাদতঃ ॥

কুংকুমৈঃ বিল্বপত্রৈশ্চ সুগন্ধৈঃ রক্তপুষ্পকৈঃ ।
রক্তপত্রৈর্বিশেষেণ পূজযন্ভদ্রমশ্নুতে ॥

॥ওঁ তৎসত্ ॥

Encoded and proofread by N.Balasubramanian bbalu@sify.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Durga Ashtottara Shatanama Stotram 2 Lyrics in Bengali PDF
% File name : durgA108stotra.itx
% Category : aShTottarashatanAma
% Location : doc_devii
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : N.Balasubramanian bbalu at sify.com
% Proofread by : N.Balasubramanian bbalu at sify.com
% Latest update : August 8, 2007
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website